नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

**VU—87–Sahit. Shas.**

No. of Printed Pages — 3

# वरिष्ठ उपाध्याय परीक्षा, 2015

## साहित्य-शास्त्रम्

समय : $3\frac{1}{4}$ घंटे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. अङ्गनानाम् आशाबन्धः कीदृशः भवति ? 1
2. आखण्डलस्य धनुः खण्डं कुतः प्रभवति ? 1
3. प्रियतम इव प्रार्थनाचाटुकारः कः ? 1
4. दोषाङ्कुशं कतिविधम् ? नामानि लेख्यानि । $1 + 1 = 2$
5. कति स्थायीभावाः ? तेषां नामानि लिखत । $\frac{1}{2} + 1\frac{1}{2} = 2$
6. व्यञ्जनायाः लक्षणं निरूपयत । 2
7. हेतु-सन्दर्भे लक्षणायाः भेदद्वयं सोदाहरणं विवेचयत । 2
8. ''कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु'' इति सूक्तेः सप्रसङ्ग-भावार्थः लेख्यः । 2
9. यति-पादयोः लक्षणं विलिखत । $1 + 1 = 2$
10. कयोश्चिद् **द्वयोः** लक्षणं सोदाहरणं विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) शोभा (ii) हेतुः (iii) युक्तिः ।
11. श्लेषगुणस्य लक्षणं विलिख्य तदुदाहरणे संगतिः विधेया । $1\frac{1}{2} + 1\frac{1}{2} = 3$

    **अथवा**

    ''स कथाशेषतां यातः समालिङ्ग्य मरुतसखम्'' इत्यत्र कः गुणः ? लक्षणेन सह सङ्गतिः करणीया ।
12. कयोश्चिद् **द्वयो**रलंकारयोः संगतिपूर्वकं लक्षणोदाहरणे विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) अर्थानुप्रासः (ii) सम्पूर्णोपमा (iii) उत्प्रेक्षा ।
13. प्रस्तुतोदाहरणेषु **द्वौ** अलंकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिरपि करणीया — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।
    (ii) उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः ।
    (iii) उत्सिक्तक्षितिभृल्लक्ष्य पक्षच्छेदपुरन्दरः ।
14. प्रयोजनभेदेन लक्षणायाः भेदान् प्रतिपादयत । 3
15. एकपञ्चाशत्-ध्वनेः भेदान् लिखत । 3
16. का नाम अभिधा ? अस्याः सभेदं सोदाहरणञ्च विवेचयत । 3
17. केषाञ्चन चतुर्णां दोषाणां लक्षणोदाहरणानि संगतिपूर्वकं लेखनीयानि — $4 \times 1 = 4$

    (i) सन्दिग्धम् (ii) अनुचितार्थम् (iii) अर्धान्तरपदापेक्षि
    (iv) क्लिष्टम् (v) श्रुतिकटुः (vi) अभवन्मतयोगः ।
18. अधोलिखितालंकारयुग्मेषु **द्वयो**रलंकारयोः परस्परं भेदः लेखनीयः — $2 + 2 = 4$

    (i) समासोक्तिः — विशेषोक्तिः
    (ii) उपमयोपमा — स्तवकोपमा
    (iii) उपमा — रूपकम् ।
19. कयोश्चिद् **द्वयोः** रसयोः लक्षणोदाहरणे विवेचयत — $2 + 2 = 4$

    (i) हास्यः (ii) शान्तः (iii) शृङ्गारः ।

20. निम्नलिखितेषु **द्वयोः** लक्षणं विलिख्य उदाहरणेषु संगमयत — 2 + 2 = 4

(i) अगुढम् (ii) वाच्यसिद्ध्यङ्गम् (iii) असुन्दरम् ।

21. सप्रसंग-व्याख्या विधेया — 5

तं पूर्वाचार्यसूर्योक्तिज्योतिः स्तोमद्गुणं स्तुमः ।
यं प्रस्तूय प्रकाशन्ते मद्गुणास्त्रसरेणवः ॥

**अथवा**

शब्दस्य लक्षणं विलिख्य रूढशब्दस्य भेदान् उदाहरणानि च लिखत ।

22. प्रस्तुत श्लोकस्य छन्दोऽलंकार निर्देशपूर्वकं सप्रसंग-व्याख्या करणीया — $\frac{1}{2} + \frac{1}{2} + 1 + 3 = 5$

तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तः स कामी,
नीत्वा मासान्कनकवलय-भ्रंश-रिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं,
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

**अथवा**

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः,
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां,
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥

23. ''महाकविकालिदासस्य मेघदूतम्'' विषयेऽस्मिन् निबन्धः लेख्यः । 5

24. सप्रसंगो भावार्थो लेख्यः — 1 + 4 = 5

सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः,
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां,
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥

**अथवा**

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः,
जम्बूकुञ्जप्रतिहतरभं तोयमादाय गच्छेः ।
अन्तः सारं घन तुलयितुं नानिलः शक्ष्यति त्वां,
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥

25. (क) कयोश्चिद् **द्वयोः** छन्दसोः गणनिर्देशपूर्वकं लक्षणोदाहरणे विलिख्य संगतिरपि करणीया — 1 + 2 × 2 = 6

(i) शालिनी (ii) हरिणप्लुता (iii) मञ्जुभाषिणी ।

(ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्दः परिचीय तल्लक्षणमपि लेखनीयम् । 1 + 1 = 2

''नात्मनो न सुहृदां प्रियं कृतम्''